"अनुक्तसङ्ख्या यत्र स्यात् शतमष्टोत्तरं स्मृतमिति" स्मरणादित्यर्थः। होमानन्तरकर्त्तव्यं स एवाह "यमधर्माभियुक्तः स्याल्लिखित्वा तन्तु पत्रके। मन्त्रेणानेन सहितन्तत् कार्य्यञ्च शिरः क्रमात्"। मन्त्रश्च, "आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति" एतत् सर्वं पूर्वाह्णे कर्त्तव्यम् तस्य प्रधानकालत्वात् तथा च नारदः "अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे। पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति"। एतत् प्राड्विवाकेनोपवासादिनियमपूर्वकं कर्त्तव्यम् तथा च नारदः "प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः। श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः। सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः। उपोषितश्चार्द्रवासाः कृतदन्तानुधावनः। सर्वेषां देवतानाञ्च पूजां कृत्वा यथाविधि"। कर्त्तुरुपवासादिकमाह "त्रिरात्रोपोषितोयः स्यादेकरात्रोपोषितस्तु वा। नित्यं देयानि दिव्यानि शुचये सार्द्रवाससे" इति। याज्ञवल्क्योऽपि "सचेलं स्नातमाहूय सूर्य्योदय उपोषितम्। कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधाविति"। अत्र सूर्योदयपदेन पूर्वाह्ण एव ग्राह्यः "पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति" नारदवचनानुरोधात्। त्रिरात्रैकरात्रोपवासयोः शक्ताशक्तविषयत्वेन व्यवस्था ज्ञेया। दिव्यप्रयोगानन्तरं दक्षिणादानम् उक्तेन विधिना दिव्यप्रयोगं कारयितुः राज्ञः फलञ्चाह पितामहः "सद्भिः परिवृतो राजा शुद्धिमेतां प्रपूजयेत्। ऋत्विक्पुरोहिताचार्य्यान् दक्षिणाभिस्तु तोषयेत्। एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान्। महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते" इति। अयञ्च विधिः सर्वदिव्यसाधारण इत्याह स एव "इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनञ्च देवानां तथैव परिकीर्त्तितमिति"। सर्वदेवावाहनादि संशोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणमित्यर्थः" दिव्यमातृका। १२जलभेदे। "दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम्। तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम्" भाव०प्र०। १३स्नानभेदे न० "असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः। मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्तितम्। "आपोहिष्ठेति" वै मान्त्रं, मृदालम्भन्तु पार्थिवम्। आग्नेयं भस्मना स्नानं, वायव्यं गोरजः स्मृतम्। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाहश्च, मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्" योगियाज्ञवल्क्यः। दिवि द्योतात्मके आदित्ये परमव्योम्नि वा ब्रह्मणि स्वस्वरूपे भवः यत्। "दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा। द्वन्द्वातीतो वीतरागः सर्वभूतसमः क्षमी" इत्युक्ते १४तत्त्ववेत्तरि पु० १५आमलक्यां स्त्री मेदि०। १६वन्ध्याकर्कोटक्याम् १७शतावर्य्याम् १८महामेदायाम् १९ब्राह्म्याम् २०स्थूलजीरके २१श्वेतदूर्वायाम् २२हरीतक्याम् २३मुरायाम् २४गन्धवत्याञ्च स्त्री राजनि०। २५दैवे दिने २६तदीये माने च न० दिव्यदिनदिव्यमानशब्दयोर्दृश्यम्। २७द्युलोकाज्जाते २८मनोज्ञे २९लोकातीते दिव्यदर्शी दिव्यचक्षुः त्रि०।

**दिव्यकट** न०प्रतीचीस्थे पुरभेदे "कृत्स्नं पञ्चनदञ्चैव तथैवामरपर्वतम्। उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम्" भा० स०३२अ० नकुलप्रतीचीजये।

**दिव्यकुण्ड** न० कामरूपपीठस्थक्षोभकशैलपूर्वभागस्थे कुण्डविशेषे। "यथा तद्दक्षिणे महाशैलः क्षोभकोनामनामतः। तस्मिन् गिरौ शिलापृष्ठवक्त्रो देवी व्यवस्थिता। पञ्चपुष्करिणी नाम्ना प्रद्युम्नयोनिस्वरूपिणी। एकत्र पञ्चभिर्दुर्गा योनिभिः पञ्चवक्त्रकम्। स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा। तच्छैलपूर्वभागात्तु कान्ता नाम महानदी। दक्षिणं सागरं याति प्रथमां चोत्तरस्रवा। दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकागतम्। संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत्। दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम्। यः पूजयेन्महाभागः स योनौ न हि जायते"। कालि०पु०८१अ०

**दिव्यगन्ध** पु० कर्म०। १मनोज्ञे गन्धे। दिव्योगन्धोऽस्य। २गन्धके ३लवङ्गे च न० ४स्थूलैलायां महाचञ्चुशाके च स्त्री राजनि०।

**दिव्यगायन** पु० कर्म०। गन्धर्वे अमरः।

**दिव्यचक्षुस्** पु०दिव्यं चक्षुर्यस्मात् ५ब०। १मर्कटे शब्दमाला। (चसमा) ख्याते २पदार्थे च ३सुगन्धभेदे ४सुलोचने च। दिव्यमन्तरीक्षभूतं चक्षुरस्य। ५अन्धे त्रि०मेदि०। कर्मधा०। ५अलौकिकपदार्थदर्शनयोग्ये नेत्रे न०"न च मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे